# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, MAY 2018**

**FIRST YEAR [BATCH 2017-20]**

**SANSKRIT (Honours)**

**Paper : II**

Date : 19/05/2018
Time : 11 am – 3 pm
Full Marks : 100

1. <u>**एकः**</u> प्रश्नः समाधेयः। [1×10]
   क) राजानो धूर्तैः कथंकारं प्रतार्यन्ते? प्रतार्यमाणानां तेषामाचरणं कीदृशं भवतीति सर्वमेतत् पाठ्यांशानुसारं वर्णनीयम्। [5+5]
   ख) भवत्पाठ्यांशानुसारं लक्ष्मीचरित्रं वर्णनीयम्।

2. अनुच्छेद<u>**द्वयस्य**</u> अनुवादः कार्य आङ्गलभाषया वङ्गभाषया वा। [2×4]
   क) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमम् अजलं स्नानमनुपजातपलितादि वैरूप्यमजरं वृद्धत्वम् अनारोपितमेदोदोषं गुरुकरणम्...।
   ख) ...उन्नमय बन्धुवर्गमभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।
   ग) आत्मन्यारोपितलोकाभिमाना मर्त्यधर्माणोऽपि द्विव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्योपहास्यताम् उपयान्ति।
   घ) ...आसन्नवर्तिनां शिरःशूलमुत्पादयन्ति, आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति, उत्कुपितलोचना इव तेजस्विनो नेक्षन्ते, कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते।

3. <u>**एकः**</u> सन्दर्भः सप्रसङ्गं व्याख्यायताम्। [1×7]
   क) भवादृशा एव भवन्ति भाजनान्युपदेशानाम्।
   ख) गन्धर्वनगरलेखेव पश्यत एव नश्यति।

4. <u>**एकः**</u> प्रश्नः समाधेयः। [1×10]
   क) भवदधीतभासनाटकम् अनुसृत्य यौगन्धरायणस्य चरित्रं वर्णयत।
   ख) भवदध्येतव्यभासनाटकस्य वस्तु कुत आहृतम्? मौलं वस्तु संक्षेपेण वर्णनीयम्। नाट्यकृतात्र नाटके नूतनं किं कृतम्? [1+4+5]

5. <u>**एकस्य**</u> पद्यस्यानुवादः कार्य आङ्गलभाषया वङ्गभाषया वा। [1×5]
   क) कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
   दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।
   आत्मानुग्रहमिच्छतीह नृपजा <u>धर्माभिरामप्रिया</u>
   यद् यस्यास्ति <u>समीप्सितं</u> वदतु तत् कस्याद्य किं दीयताम्।।
   ख) ऋज्वायतां च विरलां च नतोन्नतां च
   <u>सप्तर्षिवंशकुटिलां</u> च निवर्तनेषु।
   निर्मुच्यमानभुजगोदरनिर्मलस्य
   सीमामिवाम्बरतलस्य <u>विभज्यमानाम्</u>।।

6. <u>**एकं**</u> पद्यं सप्रसङ्गं व्याख्यायताम्। [1×7]
   क) गुणानां वा विशालानां सत्काराणां च नित्यशः।
   कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः।।

ख) नैवेदानीं दु:खिताश्चक्रवाका:
नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ता:।
धन्या सा स्त्री यां तथा वेत्ति भर्ता
भर्तृस्नेहात् सा हि दग्धाप्यदग्धा।।

7. क) सव्यासवाक्यं समासनाम लेख्यम्। [1×2]
5(क) इत्यत्र 'धर्माभिरामप्रिया' इत्यस्य
5(ख) इत्यत्र सप्तर्षिवंशकुटिलाम् इत्यस्य <u>वा</u>।

ख) व्युत्पत्तिर्निर्णेया। [1×1]
5(क) इत्यत्र 'समीप्सितम्' इत्यस्य
5(ख) इत्यत्र 'विभज्यमानाम्' इत्यस्य <u>वा</u>।

8. <u>एक:</u> प्रश्न: समाधेय:। [1×10]

क) ''स वर्णिलिङ्गी विदित: समाययौ''— प्रसङ्गेऽस्मिन् वर्णपदस्य कोऽर्थ: घण्टापथकारसम्मत:? द्वैतवनं समागतस्य वर्णिलिङ्गिनो वेदनं समासेनोपन्यसनीयम्। [2+8]

ख) ''उदाजहार द्रुपदात्मजा गिर:'' — द्रुपदात्मजा कमुद्दिश्य कीदृशीं वाचं व्याजहार? द्रौपदीवचनं समासेनोपन्यस्य वचनेनानेन प्रकाशितं द्रौपदीचरित्रवैशिष्ट्यम् आलोचयत। [1+7+2]

9. <u>एकस्य</u> पद्यस्यानुवाद: कार्य आङ्गलभाषया वङ्गभाषया वा। [1×5]

क) तथापि जिह्म: स <u>भवज्जिगीषया</u>
तनोति शुभ्रं गुणसम्पदा यश:।
<u>समुन्नयन्</u> भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभि:।।

ख) व्रजन्ति ते <u>मूढधिय:</u> पराभवं
भवन्ति मायाविषु ये न मायिन:।
<u>प्रविश्य</u> हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषव:।।

10. <u>एकं</u> पद्यं सप्रसङ्गं व्याख्येयम्। [1×7]

क) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीया: प्रभवोऽनुजीविभि:।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वच:।।

ख) अबन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्या: स्वयमेव देहिन:।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादर:।।

11. क) सविग्रहं समासनाम लेख्यम्। [1×2]

9(क) इत्यत्र 'भवज्जिगीषया' इत्यस्य

9(ख) इत्यत्र 'मूढधियः' इत्यस्य **वा**

ख) व्युत्पत्तिर्निर्णेया। [1×1]

9(क) इत्यत्र 'समुन्नयन्' इत्यस्य

9(ख) इत्यत्र 'प्रविश्य' इत्यस्य **वा**।

12. **एकः** प्रश्नः समाधेयः। [1×10]

क) अभिज्ञानशकुन्तलनाटकस्य कस्मिन्नङ्के धीवरवृत्तान्तः समुपलभ्यते? धीवरवृत्तान्तस्य नाटकीयं गुरुत्वमालोचयत। वृत्तान्तेनानेन तत्कालीनभारतवर्षस्य समाजव्यवस्थायाः राज्यशासनव्यवस्थायाश्च यच्चित्रं स्फुटीभवति तदालोचयत। [1+4+5]

ख) हंसपदिका का? भवदध्येतव्यकालिदासीयदृश्यकाव्यस्य कस्मिन्नङ्के तस्या गानं श्रूयते? गानस्य संस्कृतरूपम् उद्धरणीयम्। गीतस्यभिधेयार्थः कः? कश्च व्यङ्ग्यार्थः? वर्तमानदृश्यकाव्ये हंसपदिकावृत्तं यथा प्राप्यते तत् समासेनोपन्यस्य तदुपयोगोऽत्र निर्णेयः। [0·5+0·5+2+1+1+2+3]

13. **एकस्य** पद्यस्यानुवादः कार्य आङ्गलभाषया वङ्गभाषया वा। [1×5]

क) आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति।।

ख) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।

14. **एकं** पद्यं सप्रसङ्गं व्याख्यायताम्। [1×6]

क) त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः।।

ख) उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु सम्पदः।।

15. **एकस्य** संस्कृतरूपं **देवनागर्या** लेख्यम्। [1×4]

क) गच्छ तुमं मम केरए उडए मक्कण्डेअस्स इसिकुमारअस्स वण्णचित्तिदो मित्तिआमोरओ चिट्ठदि तं से उबहर।

ख) अणज्ज, अत्तणो हिअआणुमाणेण पेक्खसि। को दाणिं अण्णो धम्मकञ्चुअप्पवेसिणो तिणछण्णकूबोबमस्य तव अणुकिदिं पडिबदिस्सदि।

———— × ————